# JAC वार्षिक माध्यमिक परीक्षा - 2023

## विषय - संस्कृत

### बहुवैकल्पिक प्रश्नोत्तर

**वस्तुनिष्ठ प्रश्न**

**कुल प्रश्नों की संख्या** : 19

Total No. of Questions: 19

**पृष्ठों की कुल संख्या**: 16

Total No. of Pages : 16

**पूर्णांक : समय**: 1 घंटा 30 मिनट

Full Marks: 40 Time: 1 Hr. 30 Min.

**सामान्य निर्देश : GENERAL INSTRUCTIONS:**

1. **प्रश्न पुस्तिका** - (B) के प्रश्न विषयनिष्ठ हैं। यह प्रश्न- सह उत्तर-पुस्तिका है। **प्रश्न पुस्तिका - (A)** (बहुविकल्पीय) का उत्तर देने के बाद ही परीक्षार्थी प्रदत्त स्थान पर प्रश्न-सह- उत्तर-पुस्तिका **प्रश्न पुस्तिका (B)** में उत्तर दें।
2. परीक्षार्थी यथासंभव अपने शब्दों में उत्तर दें।
3. कुल प्रश्नों की संख्या 19 है।
4. प्रश्न संख्या 1 से 7 तक अति लघुत्तरीय प्रश्न हैं। इनमें से किन्हीं पाँच प्रश्नों के उत्तर दें। प्रत्येक प्रश्न का मान 2 अंक निर्धारित है।
5. प्रश्न संख्या 8 से 14 तक लघुत्तरीय प्रश्न हैं। इनमें से से किन्हीं पाँच प्रश्नों के उत्तर दें। प्रत्येक प्रश्न का मान 3 अंक निर्धारित है।
6. प्रश्न संख्या 15 से 19 तक दीर्घ उत्तरीय प्रश्न हैं। इनमें से किन्हीं तीन प्रश्नों के उत्तर दें। प्रत्येक प्रश्न का मान 5 अंक निर्धारित है।
7. परीक्षा के उपरांत **प्रश्न पुस्तिका (B)** (प्रश्न-सह- उत्तर-पुस्तिका) वीक्षक को लौटा दीजिए।

**सामान्य निर्देशाः**

सर्वे प्रश्नाः अनिवार्याः सन्ति।

प्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृते एव देयानि। प्रश्न संख्या 1 तः 7 पर्यन्तम् अति लघुत्तरीयाः प्रश्नाः, अस्य कृते 2-2 अंकौ निर्धारितौ। केचन पञ्चानां प्रश्नानाम् उत्तराणि लेखितव्यानि।

प्रश्न-संख्या 8 तः 14 पर्यन्तं लघुत्तरीयाः प्रश्नाः, अस्य कृते 3-3 अंकाः निर्धारिताः। केचन पञ्चानां प्रश्नानाम् उत्तराणि लेखितव्यानि।

प्रश्न-संख्या 15 तः 19 पर्यन्तं दीर्घोत्तरीयाः प्रश्नाः, अस्य कृते 5-5 अंकाः निर्धारिताः। केचन त्रयाणां प्रश्नानाम् उत्तराणि लेखितव्यानि।

अस्मिन् प्रश्न-पत्रे 40 ( चत्वारिंशत् ) प्रश्नाः सन्ति। प्रत्येकस्य प्रश्नस्य कृते 1 ( एकः ) अङ्क निर्धारितः अस्ति। प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत।

**खण्ड क ( अपठित-अवबोधनम् ) - 5**

निर्देशः अधोलिखितं गद्यांश पठित्वा विकल्पेभ्यः उत्तराणि चित्वा लिखत-

"एकस्मिन् तरौ हंसकाकौ निवासं कृतवन्तौ। एकदा ग्रीष्मर्तौ परिश्रान्तः कश्चित् पथिकः धनुर्वाणं समीपे निधाय प्रसुप्तः। क्षणान्तरे तस्य मुखात् वृक्षच्छाया अपगता तन्मुखं तप्तम्। वृक्षावस्थितेन तेन हंसेन पक्षौ प्रसारितौ। तन्मुखे छाया कृता, लब्धनिद्रासुखेन पथिकेन उद्घाटितम्। परसुखम् असहिष्णुः काकः तस्य मुखे पुरीषोत्सर्गं कृत्वा पलायितः। उपरि निरीक्षितम्। तेन सः हंसः दृष्टः। पथिकः क्रुद्धः अभवत्, तेन वाणेन हंसः हतः।"

1. **हंसकाकौ कुत्र निवासं कृतवन्तौ ?**

(1) पर्वतशिखरे (2) सरोवरतटे
(3) तरौ (4) समुद्रतटे

2. **पथिकः कीदृशः आसीत् ?**

(1) परिश्रान्तः (2) पिपासितः
(3) प्रमुदितः (4) बुभुक्षितः

3. **केन पक्षौ प्रसारितौ ?**

(1) मयूरेण (2) हंसेन
(3) कपोतेन (4) वायसेन

4. **काकस्य स्वभावः कीदृशः आसीत् ?**

(1) सौहार्दपूर्णः (2) चञ्चलः
(3) करुणापरः (4) असहिष्णुः

5. **'निधाय' इत्यस्मिन् पदे कः प्रत्ययः प्रयुक्तः ?**

(1) ल्यप् (2) क्तवतु
(3) तुमुन् (4) शानच्

**खण्ड ख (पठित-अवबोधनम् ) - 20**

**निर्देशः** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत-

"विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन् चौरः गृहाभ्यन्तरं प्रविष्टः तत्र निहितामेकाम् मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धः अतिथिः चौरशंकया तमन्धावत् अगृहणात् च, परं विचित्रमघटत्। चौरः एवं उच्चैः क्रोशितुमारभत्। "चौरोऽयम् चौरोऽयम्" इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौरः आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।"

6. **गृहाभ्यन्तरे कः रात्रौ प्रविष्टः आसीत् ?**

(1) अहिः (2) मार्जारः
(3) चौरः (4) कपिः

7. **अतिथिः केन प्रबुद्धः ?**

(1) घोरनादेन (2) शिशुक्रन्दनेन
(3) कोलाहलेन (4) पादध्वनिना

© JCERT not to be republished

8. **चौरः काम् आदय पलायितः ?**

(1) पात्राणि (2) मंजूषाम्
(3) आभूषणानि (4) परिधानानि

9. **वस्तुतः चौरः कः आसीत् ?**

(1) ग्राम- आरक्षी (2) अतिथिः
(3) महाजनः (4) अर्चकः

10. **उच्चैः क्रोशितुं चौरः एव आरभत् ? अत्र कर्तृपदं किम् ?**

(1) आरभत् (2) उच्चैः
(3) चौरः (4) क्रोशितुम्

**निर्देशः** अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत -

**"आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।**
**नास्ति उद्यमसमो बन्धुः कृत्वा यं नावसीदति ।।"**

11. **मनुष्याणां शरीरस्थितः कः महान् रिपुः अस्ति ?**

(1) दुर्जनः (2) कामः
(3) उद्यमः (4) आलस्यम्

12. **उद्यमसमः कः नास्ति ?**

(1) बंधुः (2) धर्मः
(3) गुरुः (4) तृष्णा

13. **आलस्यम् केषां शत्रुः अस्ति ?**

(1) साधूनाम् (2) मनुष्याणाम्
(3) पक्षीणाम् (4) वन्यजीवानाम्

14. **'अवसीदति' इति पदस्य कः अर्थः ?**

(1) पलायते (2) सुखी भवति
(3) दुःखी भवति (4) प्रकुप्यति

15. **'महान् रिपुः' अनयोः पदयोः 'रिपुः' किम् अस्ति ?**

(1) अव्ययपदम् (2) विशेष्यपदम्
(3) उपमानः (4) सर्वनामपदम्

**निर्देशः** अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत

**चाणक्यः -** कथं न ज्ञायते नाम ? भो श्रेष्ठिन् । शिरसि भयम्, अतिदूरं तत्प्रतिकारः ।

**चन्दनदासः -** आर्य । किं मे भयं दर्शयसि ? सन्तमपि गेहे अमात्यराक्षसस्य गृहजने न समर्पयामि, किं पुनरसन्तम् ?

**चाणक्यः-** चन्दनदास ! एष एव ते निश्चयः ?

**चन्दनदासः -** बाढम् एष एव मे निश्चयः ?

**चाणक्यः -** (स्वगतम्) साधु । चन्दनदास साधु ।

**"सुलभेष्वर्थलाभेषु परसंवेदने जने ।**
**क इदं दुष्करं कुर्यादिदानीं शिविना विना ॥"**

16. **कः चन्दनदासाय भयं दर्शयति ?**

(1) चाणक्यः (2) स्कन्दगुप्तः
(3) चन्द्रगुप्तः (4) समाट् अशोकः

17. **अमात्यराक्षसस्य गृहजनं कः न समर्पयितुम् इच्छति ?**

(1) शिष्यः (2) महाराज नन्दः
(3) सुदर्शनः (4) चन्दनदासः

18. **चन्दनदासस्य तुलना केन अभवत् ?**

(1) पुलस्त्येन (2) भीष्म पितामहेन
(3) शिविना (4) अगस्त्येन

19. **'मंत्री' इत्यर्थे कः समानार्थकः शब्दः प्रयुक्तः ?**

(1) श्रेष्ठिन् (2) अमात्यः
(3) बाढम् (4) प्रतिकारः

20. **चन्दनदासस्य कः दुष्करम् आसीत् ?**

(1) वाणिज्यः (2) अभिमानः
(3) ज्ञानम् (4) निश्चयः

**निर्देशः** रेखांकितपदेषु प्रश्नवाचकपदानि विकल्पेभ्यः चित्वा लिखत -

21. **करुणापरो गृही <u>तस्मै</u> आश्रयं प्रायच्छत् ।**

(1) कम् (2) कस्यै
(3) कस्मै (4) केभ्यः

22. **स <u>भारवेदनया</u> क्रन्दति ।**

(1) कया (2) केन
(3) कस्मात् (4) कस्य

23. **<u>तत्वार्थस्य</u> निर्णयः विवेकेन कर्तुं शक्यः।**

(1) कथम् (2) कस्य
(3) कस्याः (4) कदा

24. **<u>अरयः</u> व्यायामिनं नोपसर्पन्ति ।**

(1) कुत्र (2) कयोः
(3) काभ्याम् (4) के

25. **<u>तृणानाम्</u> अग्निना सह विरोधो भवति ।**

(1) कदा (2) कीदृशम्
(3) केषाम् (4) केषु

**खण्ड ग -( अनुप्रयुक्तव्याकरणम् ) 15**

**निर्देशः** अधोलिखितवाक्येषु रेखांकितपदानां संधिं/विच्छेदं वा चित्वा लिखत-

26: **अयं <u>संसारः</u> विचित्रः अस्ति ।**

(1) सम् + सरः (2) सत् + सारः
(3) सन् + सारः (4) सम् + सारः

27. **<u>वट + छाया</u> ग्रीष्मर्तौ शीतला भवति ।**

(1) वटन्छाया (2) वटच्छाया
(3) वटछाया (4) वटत्छाया

28. **<u>देवर्षि</u> नारदः मर्त्यलोकम् आगतः ।**

(1) देव + ऋषिः (2) देवाः + ऋषि
(3) देव + अर्षि (4) देव + ऋषयः

29. **अयं एकः रमणीयः <u>सरोवरः</u> अस्ति ।**

(1) सराः + वरः (2) सरो + वरः

© JCERT not to be republished

(3) सरः + वरः (4) सरः + वराः

**30.** **<u>जगत् + नाथः</u> विश्वस्य पालकः विद्यते।**

(1) जगन्नाथः (2) जगरनाथः
(3) जगलाथः (4) जगन्नाथाः

**निर्देशः** रेखाकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा समुचितं विकल्पं चित्वा लिखत -

**31.** **मार्गे <u>गम् + शतृ</u> कलहं मा कुरु।**

(1) गच्छन् (2) गत्वा
(3) गम्यमानः (4) गतवान्

**32.** **बालानां <u>बौद्धिकः</u> विकासः समुपेक्षते।**

(1) बुद्ध + इनि (2) बुद्ध + तमप्
(3) बुद्ध + ठक् (4) बुद्ध + मतुप्

**33.** **एतस्याः वाटिकायाः शोभा <u>विचित्रा</u>।**

(1) विचित्र + डाप् (2) विचित्र + टाप्
(3) विचित्र + चाप् (4) विचित्र + ङीप्

**34.** **सदाचारं यत्नेन <u>रक्षितव्यम्</u>।**

(1) रक्ष् + क्त (2) रक्ष् + अनीयर्
(3) रक्ष् + तुमुन् (4) रक्ष् + तव्यत्

**35.** **शिक्षया जनाः <u>गुण + मतुप्</u> जायन्ते।**

(1) गुणाढ्यः (2) गुणवता
(3) गुणवन्तः (4) गुणी

**निर्देश :** उचित-अव्ययपदं विकल्पेभ्यः चित्वा रिक्त- स्थानानि पूरयत-

**36.** **यत्र धूमः .............................. अग्निः अपि।**

(1) यदा (2) तत्र
(3) अधुना (4) इव

**37.** **जलं .......................... जीवनम् असम्भवम्।**

(1) नूनम् (2) एव
(3) कथम् (4) विना

**38.** **वृक्षे कपयः ................ कूर्दन्ति।**

(1) बृथा (2) अत्र- तत्र
(3) इतस्ततः (4) यत्र

**39.** **अहं ........................ विद्यालयं न गमिष्यामि।**

(1) श्वः (2) चित्
(3) खलु (4) इव

**40.** **...................... अयोध्यायाः नृपः दशरथः आसीत्।**

(1) कुतः (2) उच्चैः
(3) पुरा (4) मा

## विषयनिष्ठ प्रश्नोत्तराणि-

| | | |
|---|---|---|
| 1-(3) तरौ | 2-(1) परिश्रान्तः | 3-(2) हंसेन |
| 4.-(4) असहिष्णुः | 5.-(1) ल्यप् | 6.-(3)चौरः |
| 7.-(4) पादध्वनिना | 8.-(2) मञ्जूषाम् | 9.-(1) ग्राम-आरक्षी |
| 10.-(3) चौरः | 11.-(4) आलस्यम् | 12.-(1) बन्धुः |
| 13.-(2) मनुष्याणाम् | 14.-(3) दुखी भवति | 15.(2)विशेष्यपदम् |
| 16.-(1) चाणक्यः | 17.-(4) चन्दनदासः | 18.-(3) शिविना |
| 19.-(2) अमात्यः | 20.-(4) निश्चयः | 21.-(3) कस्मै? |
| 22.- (1) कया? | 23.-(2) कस्य? | 24.-(4) के? |
| 25.-(3) केषाम्? | 26.-(4) सम्+सारः | 7.-(2) वटच्छाया |
| 28. - (1) देव+ऋषिः | 29.-(3) सरः+वरः | 30.-(1) जगन्नाथः |
| 31.-(1) गच्छन् | 32.-(3) बुद्ध +ठक् | 33.-(2) विचित्र +टाप् |
| 34.-(4) रक्ष्+तव्यत् | 35.-(3) गुणवन्तः | 36. - (2) तत्र |
| 37.-(4) विना | 38.-(3) इतस्ततः | 39.-(1) श्वः |
| 40.-(3) पुरा। | | |

---

© JCERT not to be republished

# JAC वार्षिक माध्यमिक परीक्षा - 2023

## विषय - संस्कृत

### विषयनिष्ठ प्रश्न-सह-उत्तराणि-

**खण्ड क ( अति लघूत्तरीयाः प्रश्नाः )**

**निर्देशः** अधोलिखितं गद्यांशं श्लोकं नाट्यांशं च अधीत्य केवलं पञ्चप्रश्नानाम् उत्तराणि एव देयानि (5 x 2 = 10)

(क) गद्यांशः

कश्चिद् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् । तयोः बलीवर्दयोः एकः शरीरेण दुर्बल जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात । क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारं यत्नमकरोत् । तथापि वृषभः नोत्थितः । भूमौ पतिते स्वपुत्रं दृष्ट्वा धेनूनां माता सुरभिः नेत्राभ्याम् अश्रूणि आविरासन् ।

**पूर्णवाक्येन उत्तरत-**

**प्रश्न1. कृषकः किं करोति स्म ?** 2

**उत्तरम्-** कृषकः क्षेत्र - कर्षणं करोति ।

**प्रश्न 2. वलीवर्दयोः एकः कीदृशः आसीत् ?** 2

**उत्तरम्-** शरीरेण दुर्लभः आसीत् ।

**प्रश्न3. धेनूनां माता स्वपुत्रस्य कष्टं दृष्ट्वा किम् अकरोत् ?** 2

**उत्तरम्-** धेनुनाम् माता स्वपुत्रस्य कष्टं दृष्ट्वा नेत्रभायम् अश्रूणि आविरासन् ।

**(ख) श्लोकः**

**" एकेन राजहंसेन या शोभा सरसो भवेत् ।**
**न सा वकसहस्रेण परितस्तीरवासिना ।। "**

**पूर्णवाक्येन उत्तरत-**

**प्रश्न4. एकेन राजहंसेन कस्य शोभा भवति ?** 2

**उत्तरम्-** सरसः शोभा भवति।

**प्रश्न5. परितः तीरवासिना केन सरसः शोभा न भवति ?** 2

**उत्तरम्-** परितः तिरवासिना बकसहस्रेण सरसः शोभा न भवति ।

**(ग) नाट्यांशः**

कुशः अहमपि कुश इत्यात्मानं श्रावयामि ।
रामः अहो ! उदात्तरम्यः समुदाचारः । किं नामभवतोर्गुरुः ?
लवः ननु भगवान् वाल्मीकिः ।
रामः केन सम्बन्धेन ?
लवः उपनयनोपदेशेन ।
रामः अहमत्र भवतोः जनकः नामतो वेदितुमिच्छामि ।
लवः न हि जानाम्यस्य नामधेयम् । न कश्चिद् अस्मिन् तपोवने तस्य नाम व्यवहरति ।

**प्रश्न 6. लवकुशयोः गुरोः किं नामासीत् ?** 2

**उत्तरम्-** लवकुशयोः गुरोः नाम वाल्मीकिः आसीत् ।

**प्रश्न 7. कयोः जनकस्य नाम तपोवने कश्चिदपि न व्यवहरति ?** 2

**उत्तरम्-** लवकुशयोः जनकस्य नाम तपोवने कश्चिदपि न व्यवहरति ।

**खण्ड - ख ( लघूत्तरीयाः प्रश्नाः)**

**निर्देशः** अस्मिन् खण्डे केवलं पञ्चप्रश्नानाम् उत्तराणि देयानि (3 x 5 = 15)

**प्रश्न 8. अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा सम्पूरयत-** 3

**गुणी गुणं वेत्ति न वेत्ति निर्गुणः**
**बली बलं वेत्ति न वेत्ति निर्बलः ।**
**पिको वसन्तस्य गुणं न वायसः**
**करी च सिंहस्य बलं न मूषकः ।**

**अन्वयः -**

गुणी गुणं .......... (I) ........निर्गुणः न वेत्ति (जानाति) ......... (ii) .......... बलं वेत्ति निर्बलः न, बसन्तस्य गुणं ................(iii) ..............वेत्ति वायसः न, सिंहस्य बलं करी वेत्ति मूषकः न वेत्ति ।

**मञ्जूषा - (पिकः, वेत्ति, बली )**

**उत्तरम्-** (i) वेति (ii) बली (iii) पिकः

**9. अधोलिखितस्य श्लोकस्य भावार्थं मञ्जूषातः पदानि चित्वा लिखत-** 3

**"वयोबलशरीराणि देशकालाशनानि च ।**
**समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात् ।"**

**भावार्थः अस्ति यत् आयुः ................(i).................... स्थानं, कालं, भोजनानि च सम्यक् ................(ii)...................... एव व्यायामः कर्तव्यः अन्यथा व्यायामेन ................(iii).................... अपि भवितुं शक्यन्ते।**

**मञ्जूषा- ( विचार्य, रोगाः, बलम् )**

**उत्तरम्-** (i) बलम् **(ii)** विचार्य (iii) रोगाः

**प्रश्न 10. अधोलिखित-दिनचर्यायाँ अंकानां स्थाने कालबोधकशब्दं लिखत-** 3

**(i) रजनीशः प्रातः (6 : 00) ....... वादने शय्यात्यागं करोति ।**
**(ii) सः प्रतिदिन (7 : 15) ....... बादने स्नात्वा देवालयं गच्छति।**
**(iii) सः सायंकाले (5 : 30) ....... वादने मित्रैः सह उद्याने भ्रमति ।**

**उत्तरम्-** (i) षड् (ii) सपाद-सप्त (iii) सार्ध-पञ्च

**प्रश्न11. वाच्यानुसारं समुचित-विकल्पं चित्वा रिक्तस्थानानि पूरयत-** 3

**(i) छात्राः .............. मनसा पठन्ति ।**

(क) पाठस्य (ख) पाठाः
(ग) पाठाय (घ) पाठान्

**(ii) मया तु दूरदर्शनं ...............।**

(क) दृश्यते (ख) पश्यामि

(ग) पश्यति (घ) पश्यति

**(iii) ............... राष्ट्रगानं गायन्ति।**

(क) बालको (ख) बालकाः

(ग) बालकेभ्यः (घ) वालकैः

**उत्तरम्-** (i) (ख) पाठान् (ii) (क) दृश्यते (iii) (ख) बालकाः

**प्रश्न12. अधोलिखितवाक्येषु रेखांकितपदानि संशोध्य लिखत- 3**

(i) <u>**वृक्षेण**</u> वायुवेगेन पत्राणि पतन्ति।

(ii) इदं <u>**स्थानः**</u> अतीव सुरम्यं प्रतीयते।

(iii) <u>**सः**</u> नारी अर्द्धरात्रौ कथं विलपति?

**उत्तरम्-** (i) वृक्षात् (ii) स्थानम् (iii) सा

**प्रश्न13. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा विकल्पेभ्यः चित्वा लिखत - 3**

**(क) पुरन्दरः 'देवाधिपतिः' कथ्यते**

(i) देवानाम् अधिपतिः (ii) देवेभ्यः अधिपतिः

(iii) देवेषु अधिपतिः (iv) देवस्य अभिपतिः

**(ख) 'मक्षिकाणाम् अभावः' स्थानमिदम्।**

(i) अधिमक्षिकम् (ii) निर्मक्षिकम्

(iii) अभिमक्षिकम् (iv) बहुमक्षिकम्

**(ग) 'रामलक्ष्मणौ' भ्रातरौ आस्ताम्।**

(i) लक्ष्मणश्च रामः च (ii) रामश्च लक्ष्मणौ च

(iii) रामो च लक्ष्मणो च (iv) रामश्च लक्ष्मणश्च

**उत्तरम्-**

(क) (i) देवानाम् अधिपतिः (ख) (ii) निर्मक्षिकम्

(ग) (iv) रामश्च लक्ष्मणश्च

**प्रश्न14. अधोलिखित-पदानां समानार्थकपदैः सह मेलनं कुरुत - 3**

| | A | | B |
|---|---|---|---|
| **(क)** | **रसालः** | **(i)** | **मुक्तः** |
| **(ख)** | **काननम्** | **(ii)** | **तीव्रगत्या** |
| **(ग)** | **चक्षुर्भ्याम्** | **(iii)** | **अचिरम्** |
| **(घ)** | **शीघ्रम्** | **(iv)** | **आम्रम्** |
| **(ङ)** | **स्वतन्त्रः** | **(v)** | **अरण्यम्** |
| **(च)** | **जवेन** | **(vi)** | **नेत्राभ्याम्** |

**उत्तरम्-**

| | | |
|---|---|---|
| (क) | रसालः | = आम्रम |
| (ख) | काननम् | = अरण्यम |
| (ग) | चक्षुर्भ्याम् | = नेत्राभ्याम् |
| (घ) | शीघ्रम् | = अचिरम् |
| (ङ) | स्वतंत्रः | = मुक्तः |
| (च) | जवेन | = तीव्रगत्या |

**खण्ड 'ग' (दीर्घ उत्तरीयाः प्रश्नाः)**

**निर्देशः** अस्मिन् खण्डे केवलं त्रयाणां प्रश्नानाम् उत्तराणि लिखत- (5 x 3 = 15)

**प्रश्न15. अनुपस्थितिहेतोः प्रधानाध्यापकं प्रति लिखिते आवेदन-पत्रे रिक्तस्थानानि प्रदत्तशब्दसूचीसहायतया पूरयत- (10x1/2=5)**

............... (i)......................

प्रधानाध्यापक महोदयाः,

राजकीय उच्च विद्यालयः राँची।

विषयः- अनुपस्थितिहेतोः क्षमायाचनायै आवेदन-पत्रम्।

महाशयः,

सविनयं ..............(ii)...................... इदम् अस्ति यत् ....................(iii)................ ज्वरेण ............(iv)............. आसम्। अस्मात् ....................(v)................. अहं विद्यालयम् आगन्तुम् ........(vi).........अस्मि। वैद्येन पूर्णविश्रामं कर्तुं ...............(vii)................ अयच्छत्। अत एव त्रयाणां दिवसानां ............ (viii)..................... प्रदाय अनुगृहणन्तु ...............(ix)................. । एतदर्थम् अहं भवताम् सदैव ऋणी भविष्यामि।

धन्यवादाः। भवतः ...............(x)............. छात्रः

चन्द्रकान्तः

कक्षा दशमी, क्रमांकः 16.

**मञ्जूषा -** (पीडितः, अवकाशं, निवेदनम्, भवन्तः कारणात्, सेवायाम्, आज्ञाकारी, अहम्, परामर्शम्, अक्षमः)

**उत्तरम्-** (i) सेवायाम् (ii) निवेदनम् (iii) अहम् (iv) पीडितः (v) कारणात् (vi) अक्षमः (vii) परामर्शम् (viii) अवकाशम् (ix) भवन्तः (x) आज्ञाकारी

**प्रश्न 16. अधोदत्तं चित्रं दृष्ट्वा प्रदत्तमञ्जूषापदसहायतया संस्कृते पञ्चवाक्यानि रचयत। 5**



**मञ्जूषा-** (जलाशये, बालकाः, वर्तको वनमानुषः सन्ति, जन्तव, सिंहः, ग्रीवाम्, लम्बते, पञ्जरिकायाम्, हर्षिताः, उष्ट्रः, जन्तुशाला)

**उत्तरम्-** (i) इदं चित्रं जन्तुशालायाः अस्ति।

(ii) चित्रे पञ्जरिकायां जन्तवः सन्ति।

(iii) चित्रे वनमानुषः, सिंहः, उष्ट्रः च सन्ति।

(iv) जलाशये द्वौ वर्तकौ तरतः।

(v) बालकाः जन्तुशालां दृष्ट्वा हर्षिताः भवन्ति।।

**प्रश्न17: 'अस्माकं राज्यम्' विषयमधिकृत्य प्रदत्तमंजूषापदसहायतया संस्कृते पंचवाक्यानाम् एकम् अनुच्छेदं लिखत- 5**

**मञ्जूषा-** (राजमार्गः, झारखण्डराज्यम्, औद्योगिकम्, आरोग्यशालाः, राजधानी, उन्नतिपथम्, शिक्षालयाः, जलप्रपाताः, कार्यालयाः, रमणीया, प्रकृतिः, मुख्यमंत्री, सौविध्यम्)

**उत्तरम्-** (i) अस्माकं राज्यं झारखंड-राज्यं वर्तते।

(ii) अस्य राजधानी राँचीनगरम् अस्ति।

(iii) अत्र अनेके जलप्रपाताः सन्ति।

(iv) अत्र प्रकृतिः रमणीया अस्ति।

(v) अस्मिन् राज्ये राजमार्गाः, शिक्षालयाः च सुव्यवस्थिताः सन्ति।

**प्रश्न 18: अधोलिखितवाक्येषु रेखांकितपदमाधृत्य प्रश्ननिर्माणं- 5**

(i) सः <u>कृच्छ्रेण</u> भारम् उद्वहति।

(ii) <u>धेनूनाम्</u> माता सुरभिः आसीत्।

(iii) <u>अरयः</u> व्यायामिनं न अर्दयन्ति।

(iv) <u>प्रकृत्याः</u> सन्निधौ वास्तविकं सुखं विद्यते।

(v) <u>तत्वार्थस्य</u> निर्णयः विवेकेन एव कर्तुं शक्यः।

**उत्तरम्-** (i) केन? (ii) कासाम्/केषाम्? (iii) के? (iv) कस्याः? (v) कस्य?

© JCERT not to be republished

**प्रश्न19. अधोलिखित-वाक्यानि कथाक्रमानुसारेण पुनः लिखत-**

**(i) मयूरः कथयति - 'स्थितप्रज्ञ' इति व्याजेन बराकान्मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि।**

**(ii) सिंहः क्रोधेन गर्जति अहं वनराजः, किं न भयं जायते ?**

**(iii) सर्वे जीवाः प्रकृतिमातरं प्रणमन्ति।**

**(iv) वानरः वदति राजा तु रक्षकः भवति परं भवान् तु भक्षकः।**

**(v) एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति।**

**उत्तरम्-** (1) (v) एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति।

(2) (ii) सिंहः क्रोधेन गर्जति अहं वनराजः, किं न भयं जायते ?

(3) (iv) वानरः वदति राजा तु रक्षकः भवति परं भवान् तु भक्षकः।

(4) (1) मयूरः कथयति 'स्थितप्रज्ञ' इति व्याजेन वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि।

(5) (14) सर्वे जीवाः प्रकृतिमातरं प्रणमन्ति।

---

© JCERT not to be republished